मार्च २०१८ ईसवीयाब्दः ओ३म् R.N.I. No. UPBIL/१९९८/१४८५

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

❁ 'भारते भातु भारती' ❁

गुरुकुल-महाविद्यालय-ज्वालापुरस्य विद्यालयभवनम्



वीतराग-तार्किक-शिरोमणि-स्वामीदर्शनानन्दैः १९०७ईसवीयाब्दे स्थापितं
गुरुकुल-महाविद्यालय-ज्वालापुर-हरिद्वारम्

दूरभाष ९४१२०७३५७८, ९४१२०७३५८१ (ज्वालापुरम्) तारगृहम्- महाविद्यालय: ज्वालापुरम्


# भारतोदय:

**संस्कृत-मासिकपत्रम्**

| वर्षम् | अङ्का: |
|---|---|
| १०८ | ९ |

सम्पादक:
डॉ. केशवप्रसाद उपाध्याय:

सह-सम्पादका:
पं. हेमन्ततिवारी
डॉ. सुशीलकुमारत्यागी
डॉ. विजयकुमारत्यागी

प्रबन्ध-सम्पादक:
क्षेत्रपालसिंह: चौहान:
(मुख्याधिष्ठाता)

प्रकाशक:
गुरुकुलमहाविद्यालय: ज्वालापुरम्
हरिद्वारम्-२४९४०४
(उत्तराखण्ड-प्रदेश:)

शुल्क-विवरणम्
प्रत्यङ्कम्- १०/-
वार्षिकम्- १००/-
आजीवनम्- १०००/-


## विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| १. | श्रुति-सुधा | | ३ |
| २. | औचित्ये सर्वं प्रतिष्ठति | प्रो० वेदप्रकाश: शास्त्री | ४ |
| ३. | सम्प्रदायदर्शनेषु मोक्षस्यावधारणा(२) | डॉ. व्रजेन्द्रकुमारसिंहदेव: | १० |
| ४. | उक्ता धरासु रुचिरा शिववीरगाथा | डॉ० व्रजेन्द्रकुमारसिंहदेव: | १३ |
| ५. | दायभाग: | श्रीमेवारामकटारा 'पङ्क:' | १४ |
| ६. | श्रीगरुडध्वजस्तोत्रम् | डॉ. रामकिशोरमिश्र: | १६ |
| ७. | होलिकाऽवसरे विशिष्टानि व्यङ्ग्यानि | डॉ. प्रशस्यमित्र शास्त्री | १७ |
| ८. | सुख-दु:खे | डॉ. सुशीलकुमारत्यागी | १९ |
| ९. | भारतोदय-प्रकाशन-विवरणम् | | १९ |
| १०. | महानायकत्वं न वाऽऽप्तम् | मिश्रोऽभिराजराजेन्द्र: | २० |



**राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसाहाय्येन प्रकाशितम्**

**भारतोदय:(संस्कृत-मासिकम्)**

(RNI Regd. No. UPBIL/1998/1485)

| | |
|---|---|
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधि: | मासिकम् |
| ३. सम्पादकस्य नाम | डॉ. केशवप्रसाद उपाध्याय: |
| ४. सङ्केतेन सह मुद्रकस्य प्रकाशकस्य नाम, नागरिकता | क्षेत्रपालसिंह चौहान, भारतीय: गुरुकुलमहाविद्यालय: ज्वालापुरम् पत्रालय:- गुरुकुल काङ्गड़ी, हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |
| ५. पत्राधिकारिणां नाम्ना सह सङ्केत: पत्रालय: - | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, गुरुकुल काङ्गड़ी हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |

क्षेत्रपालसिंहचौहान इति नामाहं समुद्घोषयामि यदुपरि लिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

क्षेत्रपालसिंहचौहान

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन्॥

x x x

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः'॥

वर्षम्- १०८ | चैत्र २०७५ विक्रमाब्दः ✱ मार्च २०१८ ईसवीयाब्दः | अङ्कः- ०९

## ✱ श्रुति-सुधा ✱

ओ३म् त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः ।
विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान्॥

ऋग्वेदः १.१०.५२.१३

पदार्थः-

(**त्वम्**) जगदीश्वरः (**भुवः**) भवतीति भूः, तस्याः, (**प्रतिमानम्**) परिमाणम् (**पृथिव्याः**) विस्तृतस्याकाशस्य (**ऋष्ववीरस्य**) ऋष्वा महान्तो गुणा वीरा वा यस्य, तस्य (**बृहतः**) महाबलस्य (**पतिः**) पालकः (**भूः**) भवसि (**विश्वम्**) सर्वं जगत् (**आ**) समन्तात् (**अप्राः**) प्रपूर्द्धि (**अन्तरिक्षम्**) अनेकेषां लोकानाम् मध्येऽवकाशरूपं वर्त्तमानमाकाशम् (**महित्वा**) महत्या व्याप्त्याभिव्याप्य (**सत्यम्**) अव्यभिचारि सुपरीक्षितं वेदचतुष्टयजन्यम् (**अद्धा**) साक्षात् (**नकिः**) नैव (**अन्यः**) कश्चिदपि द्वितीयः (**त्वावान्**) त्वत्ससदृशः ॥१३॥

भावार्थः-

**यथा परमेश्वरः सर्वस्य जगतो रचयिता परिमाणकर्त्ता व्याप्तः सत्यप्रकाशकोऽस्त्यत ईश्वरसदृशः कश्चिदपि पदार्थो न भूतो न भविष्यतीति मत्वा तमेव वयमुपास्महे॥१३॥**

-महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, ३६पृष्ठे]

# ✷ औचित्ये सर्वं प्रतिष्ठति ✷

महामहोपाध्यायः प्रो० वेदप्रकाशः शास्त्री, आचार्योपकुलपति चरः
गुरुकुल-कांगड़ी-विश्वविद्यालयः हरिद्वारम्

सृष्टिकर्तुर्विधातुः समग्रेयं सृष्टिरौचित्यविचारवादिनी विराजते। जगत्यां वर्तमानानां पुरुषाणां समग्रं जीवनं यदा यदोचिताचार सम्पृक्तं भवति तदा तदा समश्नुते समीप्सितं सुखम् अन्यथाआचारणाश्चितानां जीवनं तु सुखेतरतामेव प्राप्नुते। परमपिता-परमात्मना ये निरन्तरमभ्युदयार्थं वेदाः प्रदत्ताः तेषु च वेदेषु विधिनिषेधात्मकाः सन्देशाः समाख्याताः तत्र सर्वत्रौचित्यविधिरेव भासते। परमात्मानं निजाभ्युदयं कामयमानो मेधया प्रार्थयते साधको यत् हे परमात्मन् मया वरदायिनी वेदमाता स्तुता सा मज्जीवनमुन्नेतुं दीर्घमायुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसं च दत्त्वा ब्रह्मलोकं यातु। अत्र प्रस्तूयते मन्त्रः प्रस्तुते मन्त्रे प्रार्थनायामौचित्यमेव विद्यते-

**स्तुता मया वरदा वेदमाता प्रचोदयन्तां पावमानी द्विजानाम्। आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसं मह्यं दत्त्वा व्रजत ब्रह्मलोकम्॥** [1]

एकस्मिन् मन्त्रे गमनागमनविषये प्रार्थना कृता- यल्लोके जना यथाक्रमेण भवन्ति तथा क्रमेण लोकं विहाय प्रयान्तु। यथा क्रमेणायान्ति प्रयान्ति चर्तवः। गमनागमन परम्परा सदैवाहीयमाना विद्यते परं तत्रास्ति क्रमः। क्रमौचित्यावह प्रस्तूयते मन्त्रः-

**यथा अहान्यनुपूर्वं भवन्ति, यथर्तव ऋतुभिर्यान्ति साकम्। यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम्॥** [2]

बाल्यावस्थायां वैवाहिकपरम्परानौचित्यमेव वदति, युवावस्थायामेव विवाह क्रियते। संतति क्रमस्याविच्छिन्नता युवावस्थायां सम्भाव्यते। अतो वेदमन्त्रे स्पष्टतयावस्थाविषये निगद्यते यत् तारूण्यवत्या कान्तिवत्या च युवत्या तरुणः स्वस्थः कान्तिमान् शक्तिसम्पन्नश्च पुरुषो वरणीयः।

विवाहविषये स्पष्टतयोच्यते -

**तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परियन्त्यापः। स शुक्रेभिः शिक्वभि रेवदस्मे दीदायानिध्मो घृत निर्णगप्सु॥** [3]

वेदेभ्य एवौचित्य चिन्तनं समाहृत्य मननशीलैर्मुनिभिः सुविज्ञानान्वेषकैः शास्त्रनिर्मातृभिः श्रेष्ठैः पुरुषैः समग्रं मानवाचरणं प्राय औचित्यधिया समीक्षितम्। प्राचीनतमे स्मृतिशास्त्रे प्रथमतो मनुस्मृतिरेव परिगण्यते।

---

१. अथर्व १९.७१.१

२. ऋग्वेदः १०.१८.५

३. ऋग्वेदः २.३५.४

स्मृतिकारेणादिमेन मनुना वैदिकी परम्परा पदे पदे विचारे विचारे नियमे नियमे च सम्यगनुभाविता। स्मृतिशास्त्रस्य वेदानुगामितैव सर्वैर्विद्भिः स्वीकृता। अभिवादनपरम्परा शिष्टपरम्परामिधेया विद्यते- अतएव मनुना निगदितं यत् वेदविद्या यस्मात् गुरोः सकाशाद् सम्प्राप्ता, लौकिकी विद्या यन्मुरवात् संश्रुता तथैवाध्यामिकी विद्या यस्मात् तपस्विनः समाधिगता, विद्यावता शिष्येण यतो यतः विद्या समर्जिता स स विद्यागुरुः प्रणामाञ्जलिना तोषणीयः। अत एव प्रोक्तं मनुना भगवता-

**लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा।**
**आददीद्यतो ज्ञानं तं पूर्वमभिवादयेत्॥**[४]

लौकिकव्यवहारपरम्परायां शिष्टाचारक्रमे वा दृग्गोचरीभूते ब्राह्मणे क्षत्रिये वैश्ये शूद्रे वा यथोचितानि पदानि प्रयोज्यानि। ब्राह्मणः कुशलशब्देन प्रष्टव्यः क्षत्रियस्त्वनामय शब्देन मान्यः वैश्यस्तु क्षेम् शब्देन माननीयः। तथैव शूद्रोऽपि आरोग्य शब्देन माननीयः। एवं प्रकारेण सर्वेषु वर्णेषु वर्तमानाः सर्वे यथोचितेन शब्दमाध्यमेन सत्करणीयाः। श्रीमता मनुना यत् पद्यं निगदितं तद् प्रस्तूयते-

**ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।**
**वैश्यं क्षेमं समागत्य शूद्रमारोग्यमेव च॥**[५]

एवमेवोत्तमस्य मध्यमस्य हीनस्य च औचित्य विधानेन सत्कृतिः करणीया। केन सह कथमाचरेदित्यस्मिन् विषये मनुना समुचितं पद्यमुदीरितम् -

**आसनावसथौ शय्यां अनुव्रज्यामुपासनाम्।**
**उत्तमेषु उत्तमां कुर्याद् हीने हीनां समे समाम्॥**[६]

वेदेषु वैदिक-साहत्ये धर्मशास्त्रे वा या प्रवृत्तिरौचित्यवती विलोक्यते सैव काव्यग्रन्थेषु काव्यशास्त्रीय ग्रन्थेष्वपि विद्यते। यद्यपि पृथक्-रूपेण आचार्यक्षेमेन्द्रेण औचित्यसिद्धान्तो वर्णितस्तथापि प्राग्वर्तिभिरपि काव्यशास्त्राचार्यैः स्वस्वग्रन्थेषु प्राय औचित्यमहत्त्वं स्वीकृतम्। यन्नाटकं सर्वजनचित्रानुरञ्जनकरं विद्यते तत्रापि समवलोक्यते प्रायशः सर्वत्रौचित्य-प्रभावः। नाट्यशास्त्र प्रणेत्रा सर्वसुधीजनवन्द्येन प्रचेतसा भरतमुनिना आभिनयादिविषये प्रकटितम् औचित्यमहत्त्वम्। अवस्था वेषगति-प्रचारपाठ्य-अभिनयानामौचित्यनिबन्धनं प्राह भरतमुनिः -

**वयोऽनुरूपः प्रथमस्तु वेषो-**
**वेषानुरूपश्च गतिप्रचारः।**
**गतिप्रचारानुगतं च पाठ्यम्**
**पाठ्यानुरूपोऽभिनयश्च कार्यः ॥**

नाट्यप्रकरणे देशादिनामुचिता व्यवस्थैव चमत्कारं समुत्पादयति। उचिताङ्गधृत अलकारोऽङ्गशोभां जनयति। यथा प्रवदति नाट्यशास्त्रप्रणेता भरतमुनिः।

---

४. मनुस्मृतिः २.११७
५. मनुस्मृतिः २.१२७
६. मनुस्मृतिः ३.१०७

**अदेशजो हि वेषस्तु न शोभां जनयिष्यति।**
**मेखलोरसि बन्धे च हस्यायैवोपजायते॥**

महाकविना माघेन कालगतमौचित्यं सम्भावयता अनवद्यं पद्यं निर्माय प्रशस्यं कार्यं विहितम्। यथा-

**तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः।**
**नैकमोजः प्रसादो वा रसभावविदः कवेः॥**[७]

कालगतमौचित्यं प्रवदन् शिशुपालवध-महाकाव्यकारः सङ्केतयति यद्यथा सुरतविपरीते काले लज्जैव योषितो भवति भूषणं समायाते सुरतकाले तु लज्जां विहाय सुरतं सफलयितुं नारीच्छा वर्तते। अपरिभवकाले राजा क्षमा भूषणेन भूषितो भवति परम्पराभवकाले समायाते सति स एव राजा विशिष्टपराक्रमभूषण भूषितो भवति। यथा-

**अन्मदा भूषणं पुंसः क्षमा लज्जेव योषितः।**
**पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥**[८]

औचित्य समर्थको विद्यते भामह-काव्यालङ्कारस्य- प्रथमे परिच्छेदे कतिपयदोषान् विगणयन् भामह क्वचिद् दोषान् शोभावर्धकान् सौन्दर्यवर्धकान् च कथयति। आश्रय प्रभावात् दोषोऽपि गुणायते क्वचित्। उक्तमपि-

**'सन्निवेषविशेषात्तु दुरूक्तमपि शोभते'**

अपि च- किञ्चिदाश्रयसौन्दर्यात् धत्ते शोभामसाध्वपि। आचार्यभामहेनोदीरितं यत् या पुनरुक्तिरन्यैराचार्यैः दोषमध्ये परिगणिता सैव पुनरुक्तिर्यदि भयशोकादिकाले कथ्यते सा भवति शोभावहा- यथा-

**भयशोकाभ्यसूयासु हर्षादिविस्मयोरपि।**
**यथाहगच्छ गच्छे इति पुनरुक्तं न तद् विदुः॥**

तथैव- प्रिये नास्ति पुनरुक्तम्।

आचार्यदण्डिना दोषापवादं स्वीकुर्वाणेन कथितं यत् कश्चित् परिस्थितिविशेष एव दोषं जनयति परिस्थिति परिवृत्तिरेव दोषं दोषात् मोचयति। आचार्यदण्डीमतानुसारं स्वीक्रियते यद्दोषोऽपि कविप्रतिभाबलेन गुणतामेति यथा-

**विरोधस्सकलोऽप्येष कदाचित् कविकौशलात्।**
**उत्क्रम्य दोषगणानां गुणवीथीं विगाहते॥**

**यशोवर्मण औचित्यदृष्टिः-** कन्नौजनृपतिना यशोवर्मणा रामाभ्युदयनामकं नाटकं निर्माय औचित्यविषयकं मतं प्रकटितम्। यद्यपि तन्नाम नाटकं न सम्प्राप्यते परं स्वग्रन्थे शृङ्गारप्रकाशे श्रीमता भोजराजेन कथितं यत् यशोवर्मणा स्वनाटकं रसगतौचित्यस्य वर्णनं यदपि कृतं तत् सर्वैरेव समालोचकैः स्वीकर्त्तव्यम्। तन्मतानुसारं नाटके पात्राणां प्रकृत्यनुसारमेव नियोजनं विभाति। रसस्थितिरपि पात्रानुगामिनी भूत्वा प्रकटयति समुचितां रसमयताम्। यथा-

**औचित्यं वचसां प्रकृत्यनुगतं सर्वत्र पात्रोचिता।**
**पुष्टिं स्वावसरे रसस्य च कथा मार्गे न चातिक्रमः॥**

श्रीमता भट्टलोल्लटेन रसौचित्यं प्रधानतया स्वीकृतम्। तन्मतानुसारं पदानामर्थानां च निबन्धनं रसापक्षयैव विधेयम्। महाकाव्ये

७. शिशुपालवधम् २.८३
८. शिशुपालवधम् २.४४

प्रकृतिचित्रणे रसानुकूलता कदापि न हेया। अङ्गीरसेन सह अङ्गरसानामुचितं सन्निवेशनमेव रसं पोषयति यथा–

**रसवत् एव निबन्धो युक्तः न तु नीरसस्य॥**

**रूद्रटस्यौचित्यचिन्तनम्-** काव्यशास्त्रमर्मज्ञेन श्रीमता रूद्रटेन यद्यपि सर्वत्रालङ्कारविषये पाण्डित्यं प्रदर्शितम्। तथापि रससिद्धान्तं विपुलतया वर्णयता तेन त एव अलङ्काराः समर्थिताः येषां निवेषनं रसपोषणाय भवति। औचित्यं विचारयता कविना समयं समीक्ष्य अनुप्रासाद्यलंकाराणां हानोपादानविषये मतिर्विधेया। यथा–

**एताः प्रयत्नादधिगम्य सम्यक्,**
**औचित्यमालोच्य यथार्थ संस्थम्।**
**मिश्राः कवीन्द्रैरघनाल्पदीर्घा,**
**कार्या मुहुश्चैव गृहीतमुक्ताः॥**

**आनन्दवर्धनस्यौचित्यमननम्-** यद्यप्यानन्दवर्धनस्य ध्वनिसिद्धान्तः प्रसिद्धो विभाति तथापि तेनापि रसविषये ध्वनिविषये तथालंकारविषये स्वीकृतमौचित्यम्। यो हि रसध्वनिः काव्यात्मत्वेन तेन कथितः, सोऽपि रस ध्वनिस्तदैव सहृदयहृदयाह्लादकरो भवति यदा रसे विलसत्यौचित्यम्। यद्यप्यलङ्काराणां स्वतन्त्र-रूपेण कापि स्थितिर्न विद्यते। यतो हि कस्यचिदप्यलंकारस्ययोजनम् रसमलङ्कार्यम् अलंकर्तुं भवति रसे सति अलङ्कारगतमौचित्यं प्रभावं जनयति विलुप्ते रसे काव्यं काव्यमेव नापितु केवलं पदविन्यासरूपमेव। आनन्दवर्धनेन गुणौचित्यविषये यन्निगदितं तदेवादाय अन्यैरपि चिन्तमकारि। तेन गुणस्य साक्षात्सम्बन्ध रसेन सह स्थापितः। ध्वनिवादिना यदरसौचित्यविषये लिखितं तदतीव रमणीयमपि ग्राह्यमपि धिया ध्येयमपि विद्यते। ताः कारिका प्रस्तूयन्ते या आनन्दवर्धनेन समीरिताः –

**गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा।**
**रसांस्तन्नियमे हेतुरौचित्यं वाक्तृवाच्ययोः ॥**
**अनौचित्यादृते नान्यद्रस भङ्गस्य कारणम्।**
**औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥**
**रसभावादि सम्बद्धा यद्यौचित्यानुसारिणी।**
**अन्वीयते वस्तुगतिदेशकालादिबोधिनी ॥**

एवं प्रकारेणाचार्यानन्दवर्धनेनौचित्यचिन्तनं वर्धितम् अन्ये च काव्यशास्त्रज्ञाः सम्प्रेरिताः। आचार्यराजशेखरेण उचितस्यानुचितस्य विवेचनायां स्वबुद्धिकौशलं प्रकटितम् तन्मतानुसारं व्युत्पत्तिर्या काव्यकरणे काव्यतत्त्वज्ञैराख्याता सा व्युत्पत्तिरुचितानुचित विवेकप्रदायिनी भवति। अत एवोदीरितं पण्डितप्रवरेण राजशेखरेण यत्– उचितानुचितविवेको व्युत्पत्तिरिति यायावरीयः।

राजशेखरस्य बुद्धिमत्या पत्न्यापि काव्य-पाक-विषये सुविचार्य कथितं यत् रसानुकूलतासम्बद्धानां शब्दार्थवतीनां सूक्तीनां निबन्धनमेव कवित्वशक्तिपाकं परिपुष्णाति। यथा– रसानुकूला शब्दार्थरचना यदा क्रियते तदा सा रसवत्तां प्रकटयति।

**आचार्यअभिनवगुप्तस्यौचित्यविषयकं चिन्तनम्-** औचित्य परम्परायाम् अभिनवगुप्तस्य विशिष्टं

स्थानं दृश्यते, ध्वन्यालोकस्य लोचनटीकाकर्त्रा तेन आनन्दवर्धनस्य मतं व्याकृतं शक्तिसम्पन्नं च कृतम्। रसध्वनिना सह औचित्यसम्बन्धं द्रढ़यन् स यां पदरचनां रचयामास सा प्रस्तूयते- उचितशब्देन रसविषयमौचित्य भवतीति दर्शयत् रस ध्वने: स जीवितत्वं सूचयति- औचित्यवती (अतिशयोक्ति:) जीवितं चेद् भवति, औचित्यनिबन्ध रसभावादि मुक्त्वा नान्यत् किञ्चिदस्तीति, तदेवान्तर्मासि मुख्यं जीवितमित्यभ्युपगन्तव्यं न तु सा।'' एतेन ज्ञायते यत् श्रीमता गुप्तपादेन रसेन ध्वनिना च सह सम्बन्ध: समालोचित:।

श्रीमता भोजराजेन औचित्यसिद्धान्त: सुविस्तृत: सरलश्च कथित:। तस्य स्थिति: काव्ये सर्वेषु स्थानेषु स्वीकर्त्तव्या। स: कथयति यत् कविना वक्तारमीक्ष्यैव अनुकूला शब्दरचना रचनीया। यतो हि नागराणां ग्रामीणानां च भाषा असमा बहुधा भवति अतस्तत्र यथार्थता संगमनाय उचिता पदावली प्रयोज्या। अनुचिता प्रयुक्ता पदावली औचित्यं हरति अत: सूक्ष्मतया विचार्यैव कविकर्मकरणे मतिर्विधेया। अलंकारप्रयोग-प्रसङ्गेऽपि भोजराजेन भाषागतमौचित्यं कदापि न हेयमिति कथितम्। औचित्यस्य समेषामपि प्रकाराणां भेदानां वा रसेन सह सम्बन्धो भवतीति निगद्य भोजराज: सर्वत्र स्वीकरोति औचित्य सिद्धानाम्।

श्रीमता कुन्तकेन यद्यपि वक्रोक्तिरेव काव्यजीवितमिति निगद्य वक्रोक्तिसिद्धान्तस्य प्रतिष्ठापना कृता परं तथापि वक्रोस्ति प्रसङ्गे तेनौचित्यसिद्धान्तस्य महत्त्वमपि न विस्मृतम्। तेन काव्यशास्त्रविदा यदपि वर्णनमौचित्यस्य कृतं तटतीव तोषावहं विद्यते- यथा

**आञ्जसेन स्वभावस्य महत्त्वं येन पोष्यते।**
**प्रकारेण तदौचित्यमुचिताख्यानजीवितम्।**
**यत्र वस्तु: प्रमातुर्वा वाच्यं शोभाति शायिना।**
**आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते ॥**

व्यक्तिविवेककारेण विद्यावता महिम-भट्टेन पञ्चधा वर्णिता: काव्यदोषा ये प्रकल्पिता: सन्ति ते तन्मतानुसारम् अनौचित्यमेव प्रकटयन्ति। काव्ये रसप्रकृतिगतमौचित्यमेव गुणावहमन्यथा तु तदगुणतामुपैति। एतेन ज्ञायते यत् महिमभट्टेन ध्वनिविरोधिना अनुमानवादिनापि स्वीकृतम् औचित्यानुपालनम्।

काव्यशास्त्रमर्मज्ञेन वाग्देवतावतारेण आचार्यमम्मटेन स्वविरचिते काव्यप्रकाशे बहुत्र औचित्यस्य वर्णनं विधाय तन्महत्त्वमपि स्वीकृतम्। काव्यप्रयोजने कारिकावृत्तिं प्रकुर्वाणेन तेन "राजादिगतोचिताचारपरिज्ञानमिति'' निगद्य औचित्यमभिमानितम्। श्रीमतामम्मटेन कथितं यत् क्वचिद् सञ्चारिण: पदवाच्यतापि न दोषावहा। यथा-

**'न दोष: स्वपदेनोक्तावपि सञ्चारिण: क्वचित्'**
**'सञ्चार्यादेर्विरुद्धस्य वाध्यस्योक्तिर्गुणावहा'**

रसविरोधपरिहारे यत् कारिकाद्वयम् मम्मटेनोदीरितम् तदपि प्रकारान्तरेणौचित्यमेव समर्थयति। यथा-

**आश्रयैक्ये विरुद्धो य: स कार्यो भिन्नसंश्रय:।**
**रसान्तरेणान्तरितो नैरन्तर्येण यो रस: ॥**

**स्मर्यमाणोविरुद्धोऽपि साम्येनाथ विवक्षितः।**
**अङ्गिन्यङ्गत्वमाप्तौ यौ तौ न दुष्टौ परस्परम्॥**

अष्टमोल्लासे रचनावृत्तिवर्णविषये तेनोदीरितम् यत् क्वचित् प्रबन्धगतौचित्येन रचनाऽपि वृत्तिरपि वर्णोऽपि चान्यथात्वेन गृह्यन्ते काव्यशोभासंवर्धनाय। यथा-

**वक्तृ-वाच्य-प्रबन्धानामौचित्येन क्वचित् क्वचित्।**
**रचनावृत्तिवर्णानामन्यथात्वमपीष्यते॥**

एवं आचार्यमम्मटेनापि स्वमन्तव्ये गुरुतयानूनम् औचित्यसिद्धान्तस्य प्रशंसनम् विधाय काव्यशास्त्रे काव्ये जगद्व्यवहारे चौचित्यमुन्नीतम्। यदा सर्वैरेव काव्यशास्त्रविद्भिर्नाट्यशास्त्रविद्भिश्च औचित्यसिद्धान्तः स्वीकृतस्तदा आचार्य-क्षेमेन्द्रेणौचित्यगरिमाणमुद्वीक्ष्य औचित्यमेव काव्य-जीवितमिति मत्वा पृथकतः काव्यशास्त्रे स्वमतं प्रतिष्ठापयताम् "औचित्यविचारचर्चा" काव्य-शास्त्रीया रचना कृता। आचार्यक्षेमेन्द्रेण औचित्यस्याधिष्ठातृदेवं श्रीकृष्णममिवीक्ष्य तदौचित्यकारित्वमालोच्य स्तवनं कृतम्। यथा-

**कृतारिवञ्चने दृष्टिर्येनाञ्जनमलीमसा।**
**अच्युताय नमस्तस्मै परमौचित्यकारिणे ॥**

आचार्यक्षेमेन्द्रः कथयति यदौचित्यमेव काव्ये प्रधानं तत्त्वं विद्यते काव्यजीवितं केवलमौचित्यमेवास्ति। यद्यपि सन्त्यलंकाराः सन्ति गुणाः परं तत्रापि महत्ता विद्यत औचित्यस्यैव। क्षेमेन्द्रेण उचितस्यभावमौचित्यमिति निगद्य निर्मलतया निर्वचनतया स्वमतमौचित्यमतमिति निश्चितम्। क्षेमेन्द्रस्य कारिकाबद्धं यदौचित्यचिन्तनं विद्यते तदेवाविकलतया प्रस्तूयते-

**औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।**
**रसजीवित भूतस्य विचारं कुरुते अधुना॥**
**काव्यस्यालमलंकारैः किं मिथागणितैर्गुणैः।**
**यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते ॥**
**अलंकारास्त्वलंकारा गुणा एव गुणाः सदा।**
**औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् ॥**
**उचित - स्थान - विन्यासादलंकृतिरलंकृतिः।**
**औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणा ॥**
**उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।**
**उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ॥**

आचार्यक्षेमेन्द्रेण बहूनभेदानौचित्यस्य परिकल्प्य सर्वैरेव स्वीकृत औचित्यसिद्धान्तो विख्यातिं नीतः। निम्नकारिकासु सर्वे प्रकाराः सन्ति चिन्तनीया। यथा-

**पदे वाक्ये प्रबन्धार्थे गुणेऽलंकारणे रसे।**
**क्रियायां कारके लिङ्गे वचने च विशेषणे ॥**
**उपसर्गे निपाते च काले देशे कुले व्रते।**
**तत्त्वे सत्त्वेऽभिप्राये स्वभावे सारसंग्रहे ॥**
**प्रतिभायामवस्थायां विचारे नाम्यथाशिषि,**
**काव्यस्याङ्गेषु च प्राहुरौचित्यं काव्यजीवितम्॥**

औचित्यस्य सर्वत्रगामिता विषये समस्तविद्वज्जनानुमोदिता कारिका समस्त तामिस्र-नाशिनी कथ्यते-

**औचितीमनुधावन्ति सर्वेध्वनिरसोन्नयाः।**
**गुणालंकृतिरीतीनां नयाश्चानृजु वाङ्मयाः ॥**

# ✷ सम्प्रदायदर्शनेषु मोक्षस्यावधारणा(२) ✷

डॉ. व्रजेन्द्रकुमारसिंहदेवः
श्रीभगवानदासादर्शसंस्कृतमहाविद्यालयः, हरिद्वारम्

## मध्वदर्शने मोक्षस्यानुशीलनम्

साक्षाद्विष्णुरेवेश्वरः। स अनन्तगुणवान्। तद्गुणाश्च निरतिशया, निरवधिकाश्च। आनन्त्यं तस्मिन् सजातीय-विजातीयोभयविधम्। उत्पत्ति-स्थिति-विनाश-नियमन-ज्ञानावरण-बन्ध-मोक्षाणां कर्त्ता विधाता भगवान् विष्णुरेव। सर्वज्ञश्च। जीवाज्जड़प्रकृतेश्च स सर्वथा भिन्नः विलक्षणश्च। ज्ञानानन्दकल्याणगुणादयस्तस्य शरीरत्वेन उन्नीयन्ते। मुख्यया वृत्त्या स समस्तपदवाच्यः। अतः सशरीरत्वे सत्यपि तस्य नितयता स्वतन्त्रता च न विहन्यते। एकः सन्नपि स नानारूपधारः। समस्तरूपेण च परिपूर्णः। अतः मत्स्याद्यवताररूपेणापि तस्य पूर्णता कथमपि न व्याकुलीभवति। उक्तञ्च माध्वबृहद्भाष्ये-

**अवतारादयो विष्णो सवे पूर्णा प्रकीर्त्तिताः।**
**पूर्णं च तत्परं पूर्णं पूर्णात्पूर्णा समुद्गताः॥**

लक्ष्मी -

माध्वानां परमात्मशक्तिरेव लक्ष्मीः सा च सर्वथा परमात्मनोऽधीना सत्यपि ततो भिन्ना। 'परमात्मभिन्ना तन्मात्राधीना लक्ष्मी' तदेवं माध्वनये, शक्ति-शक्तिमतोर्नाभेदः। लक्ष्मीश्चेयं भगवतो विष्णो किञ्चिन्तयूना सत्यपि निधतयमुक्ता नानारूपधारिणी भगवतो वधूरिव विलसति। यथा भगवान् विष्णु दिव्यशरीरसम्पन्नः तथैव भगवती लक्ष्मीरपि अप्राकृतविग्रहवती। एतएव अक्षरा। उक्तञ्च माध्वभाष्ये-

**'लक्ष्मीरक्षराऽदेहत्वात् अक्षरस्तत्परो हरिःच**
(ऐतरेयभाष्ये)

अपि च -

**द्वाविमौ नित्यमुक्तौ तु परमः प्रकृतिस्तथा।**
**देशतः कालतश्चैव समव्याप्तादुभावजौ॥**
(भागवततात्पर्यनिर्णये)

जीवो माध्वमते संसारी, कर्मानुगुण्येन सुखदुखोपभोक्ता, जन्ममरणशीलश्च। स च त्रिविधः- मुक्तियोग्यः, नित्यसंसारी, तमोयोग्यश्चेति। तत्र मुक्तियोग्या जीवा देव-ऋषि-पितृ-चक्रवर्त्ति-उत्तमभेदात् पञ्चविधाः। नित्यसंसारी, सर्वकालावच्छदेन जन्मबन्ध-सरणिपतितः संसरणशीलः। एतत्कोटिगता जीवाः मध्यमाः उच्यन्ते- 'मध्यमा मानुषा ये तु संसृतियोग्याः सदैव हि' (भा०ता० निर्णये) ते च न कदापि मुक्ति प्रपद्यन्ते। तमोयोगयानां जीवानां चातुर्विध्यम्- दैत्यराक्षस-पिशाच-अधमा इति। सर्वेऽप्यमी जीवा व्यक्तितो भिन्नाः। सर्वज्ञपरमात्मनस्तु सर्वथा भिन्नाः। न चेदं जीवानां तारतम्यं संसृत्वस्थायामेव, अपितु मुक्त्यवस्थायामपि तत् सम्भवति। 'मानुषादि विरञ्चिपर्यन्तं तारतम्यं विमुक्तिगतम्। (मध्व०) आनन्दानुभूतितारतम्यभेदश्च तेषा ज्ञज्ञनतारतम्यभेदात्। घनिरञ्जनः परमं साम्यमुपैति।'

इत्यत्र साम्यपदं प्राचुर्यवचनं मध्वानाम्। ब्रह्मणः चिदंशमादार्यव, ब्रह्मणो जीवस्यैक्यमभिमतम्, परं तदैक्यं न वास्तवम्। जीवब्रह्मणोरभेद एवैषामभ्युपगमः। तथा च माध्वाचार्य-

**जीवस्य तादृशत्वं च चित्त्वमात्रं न चापरम्।**
**तावन्मात्रेण चाभसो, रूपमेषां चिदात्मनाम्॥**

आध्वानां व्याकृताकाशः न्यायवैशेषिकयोर्दिक्-सदृशः सृष्टिप्रलययोरविकृतरूपेण अवतिष्ठते। भूताकाशादयं सर्वथा भिद्यते। उत्पत्तिमत्वाद् भूताकाशस्य अनित्यत्वम्, अविकृततत्त्वादस्य तु नित्यत्वं व्यापकत्वञ्चेति। लक्ष्मी खल्वस्याभिमानिनी देवता। प्रकृतिर्हि जड़रूपा नित्या व्यापिनी सर्वजीवलिङ्गशरीर-रूपा। एवं द्वैतवादि माध्वनये, परमात्मा केवलं जगतो निमित्तकारणम् उपादान्तु प्रकृतिरेव। वैष्णवान्तरवत् शुद्ध सत्ता नानेन स्वीक्रियते। अस्मात् शुद्धसत्त्वादेव जीवानां लीलामयो विग्रहो निर्मीयते तत्र सत्त्वाभिमानिनी श्री, रजोभिमानिनी भू, तथा तमोऽभिमानिनी च दुर्गा।

महत्तत्त्वादिद्रव्यान्तराणां कल्पना तु सांख्यादि-मतानुसारिणी वेति दिक्।

**साधनासरणिः -**

श्रवणमनननिदिध्यासनतारतम्यस्य प्रपञ्चभेदस्य च ज्ञानमावश्यकम्। सकलेषु पदार्थेषु जगतस्तारतम्यभेदो लब्धसत्ताकः स च पञ्चप्रकारकः। ईश्वरस्य जीवाद् भेदः, ईश्वरस्य जड़ाद् भेदः, जीवस्य जड़ाद्, जीवस्य जीवान्तराद्, जड़स्य जड़ान्तराच्चेति। एतस्य पञ्चविधस्य भेदस्य सम्यग्ज्ञानं माध्वानां मुक्तिसाधकम्। उपासना च द्विविधा, सन्ततशास्त्राभ्यासरूपा, ध्यानरूपा च। साऽपि भिद्यते अधिकारिभेदेन। ध्यानं हि एषां नये, विषयान्तरतिरस्कारपूर्वक भगवद्विषयिकाऽखण्डस्मृतिः च (म०सि०सा०पृ०१३१) परमेश्वानुग्रहमन्तरा जीवः साधारणमपि कर्म कर्त्तुं नेष्टे। मुक्तेर्गाथा तु दूरे आस्ताम्। अनुग्रहविशेषेण मुक्ति प्रतिपद्यते जीवः। स चानुग्रहः परमभक्तिलभ्यः। परमा भक्तिस्तु ज्ञानानन्तरमेव शक्यसम्भवा। तदेवं क्रमेण जायते ज्ञानोदयः, तदनन्तरं परमभक्तिसमुत्पत्तिः, ततो ब्रह्मानुग्रहः, ततश्च मोक्षसमुद्भवः। स च मोक्षश्चतुर्विधः- कर्मक्षयः, उत्क्रान्तिः, अचिरादिमार्गो, भोगश्चेति। भोगश्चापि चतुर्विधः सालोक्य-सामीप्यसारूप्य-सायुज्यभेदात्। तत्र सायुज्यं नाम भगवन्तं प्रविश्य तच्छरीरेण भोगः। सोऽयं संक्षेपतो माध्वदर्शनपरिचयः। केनापि कविना मध्वसिद्धान्ताः पद्यबद्धाः कृताः विलसन्तिः-

**श्रीमन्मध्वमते हरिः परतमः सत्यं जगत् तत्त्वतो,**
**भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः।**

**वल्लभदर्शने मोक्षस्यावधारणा**

बल्लभनयेन ब्रह्मणः सर्वधर्मविशिष्टत्वम् अङ्गीकृतम्। अतएव तस्य विरुद्धधर्माश्रयत्वम्। अद्वैतवादिनां निर्गुणं, निर्विशेषनिर्धर्मकञ्च ब्रह्म, मायासम्पर्कात् यत् सगुणत्वादिमद्वदाभासते, तद्वाल्लभा न सहन्ते। यतः अहिकुण्डलवद् ब्रह्मणि उभयरूपता श्रुतिसिद्धा एव।

उभयव्यपदेशात् त्वहिकुण्डलवत्।।

ब्रह्मणि विरुद्धधर्माणामस्तित्वं न मायौपाधिकम् अपितु नैसर्गिकमेव। भगवतो ब्रह्मणो हि अनवगाह्यो महिमा, तत्खलु अणोरणीयः, महतश्च महीय इति सुस्पष्टं श्रुतिर्निरूपयति। ब्रह्म सदपि अनेकरूपम् अद्वितीयत्वञ्च जहाति, स्वतन्त्रं सदपि भक्ताधीनम्। अखिलं जगदिदं भगवल्लीलामयमिति वाल्लभो नयः। वाल्लभाचार्याणां मते ब्रह्मणत्रैविध्यम्- आधिदैविकं परं ब्रह्म, आध्यात्मिकम् अक्षरं ब्रह्म, आधिभौतिकं पुनः जगदात्मकं ब्रह्म। अतः जगदपि ब्रह्मरूपमेव। कारणकार्ययोरभेदात्। आविर्भावदशायां ब्रह्मणो जगद्रूपत्वम् तिरोभावदशायां ब्रह्मरूपत्वमिति। आविर्भावः सृष्टिप्रसरो वा ब्रह्मणो लीलामात्रम्। अत एव नित्यमिति। परब्रह्म चैषां नये अखिलरसामृतमूर्तिर्निखिललीलाधाम भगवान् श्रीकृष्ण एव। स च पुरुषोत्तमपदेनापि व्यपदिश्यते। ब्रह्मप्राप्तिस्तु केवलमनन्यया भक्त्या एव।

'पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया। च इति गीतावचनमालम्ब्य आचार्या अप्याहु-

'तेन ज्ञानमार्गिणां न पुरुषोत्तमप्राप्तिरिति सिद्धम्।' यस्यान्तःस्थानीत्यनेन परस्य लक्षणमुक्तम्। तच्च भक्त्यादिप्रसङ्गे श्रीगोकुलेश्वरे स्पष्टमुच्यते। एतदप्युक्ततत्त्वमेवानुगृह्णाति।

जीवश्च वल्लभाचार्याणां तिरोहितानन्दादिगुणः स्वयमीश्वर एव। स वलं लीलविलुलिमना एव तथात्वं प्रतिपद्यते यदृच्छया न जातु माययोद्वेल्लितः। तादृशे जीवे ऐश्वर्यतिरोधानेनैव दैन्यं, यशस्तिरोधानेनैव हीनता, श्रीतिरोधानेनैव निरस्तसमस्तसम्पदास्पदत्वम्। ज्ञान-तिरोधानेनैव स अनात्मरूपेषु देहादिपदार्थेषु आत्मबुद्धिर्वितनोति। आनन्दतिरोधानेन च दुःखक्लेशादिकमनुभवति। ब्रह्मण आविर्भूतस्याऽपि जीवस्य अग्निस्फुल्लिङ्गवद्भेदसद्भावेन तद्रूपत्वं नित्यत्वञ्च न विहन्यते। एतद्धि खलु व्युच्चरणं, नोत्पत्तिः, अतः तन्नित्यत्वहानेर्न कश्चन प्रश्नः। वल्लभसम्प्रदायेऽपि जीवस्याणुत्वं ज्ञातृत्वम्। ब्रह्मणोऽविकृतचिदंशतो जीवस्य, अविकृतसदंशतो अचित्प्रकृतेर्निर्गतिः। जड़निर्गमनकाले च, उभयो चिदानन्दांशयोस्तिरोधानं, जीवनिर्गमनकाले च केवलमानन्दांशयोरेव इति 'प्रमेयरत्नार्णवे'। स च जीवत्रिविधः- शुद्धो मुक्तः संसारी चेति। वह्निस्फुल्लिङ्गवद् व्युच्चरणकाले, अविद्योपहितत्वेन तिरोहितानन्दांशः संसारी। तिरोहितानन्दांशः अविद्या-सम्पर्कात्पूर्व शुद्धः। संसारी च पुनर्दैवासुरभेदेन द्विविधः। तत्र दैवजीवोऽपि मर्यादामार्गीय-पुष्टिमार्गीयभेदेन द्विविधः। मुक्तजीवेष्वपि मुक्ता जीवनमुक्ताश्चेति द्विविधा जीवाः।

मुक्तजीवस्य भगवतः सच्चिदानन्दात् नितान्तोऽभेदः। संसारी जीवः पुष्टिमार्गावलम्बनेन उपलब्धभगवदनुग्रहः पुनः तिरोहितानन्दांशं प्रतिपद्यमानः सच्चिदानन्दतामवगाहते। 'तत्त्वमसि श्वेतकेतो! इति 'महावाक्यम्' एषां नयेना मुमेवार्थमनुगृह्णाति। यथा सुवर्णकटककुण्डलादीनां सुवर्णादभेदः तद्वद्ब्रह्मणो जीव स्याप्यभेदः (शुद्धाद्वैतमार्त्तण्डः)।

जगद्विषये च वाल्लभानां अविकृतपरिणामवाद एव अभ्युपगमः। कनककामधेनु-कल्पवृक्षचिन्तामणिवत् सच्चिदानन्दातमकं निर्गुणं ब्रह्मैव जगद्रूपेण परिणमति। यथा कुण्डलादिषु परिणतमपि सुवर्णं विकृतिभावं न प्रतिपद्यते, तद्वज्जगद्रूपेण परिणम्यमानमपि ब्रह्म न किञ्चिदपि परिणतिमुपास्ते। श्रीमद्भागवतस्य दशमस्कन्धेऽस्यैव निपुणं कृतमुपलभ्यते।

'यथा सुवर्णं सुकृं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत्।। च

वाल्लभानां न जगत उत्पत्तिविनाशौ प्रत्युताविर्भाव-तिरोभावौ। आविर्भावश्चैषाम् अनुभवविषयत्वयोग्यता तदविषयत्वं तिरोभावः (विद्वन्मण्डन पृ० ७) वल्लभनये, जगत्संसारयोरपि भेदः। ईश्वरेच्छाविलास-विशेष-समुद्भूतपदार्थो जगत्, किन्त्वविद्योपहितजीव-द्वाराकल्पितममतारूपपदार्थश्च संसारः। अविद्यायाः स्वरूपाज्ञान-देहाध्यास-इद्रियाध्यास-अन्तःकरणाध्यास-लक्षणानि पञ्चपर्वाणि। अविद्यासत्त्वे संसारः, सति ज्ञानोदये तद्विनाशः। जगतो ब्रह्मरूपत्वान्न कदापि विनाशापत्तिः। तत्तु नित्यमेवेति विवेकः।

## पुष्टिमार्ग

आचार्याणामाचारमार्ग एव पुष्टिमार्ग उच्यते पुष्टिशब्दश्चानुग्रहवचनः। पोषण। तदनुग्रहः 'मुक्तिम्प्रति प्रमुखकारणता चानुग्रहस्यैवेति (भा० २/१०) कृत्वैव वल्लभसम्प्रदायोऽयं पुष्टिमार्ग इति पदव्यपदेशभाक्। वाल्लभा मन्यन्ते यदस्ति मर्यादामार्ग-पुष्टिमार्गयोः नितरां भेदः। अक्षरब्रह्मणो वाणीतो निःसृतत्वात् मर्यादामार्गोऽयं

वैदिकः खलु। परं पुष्टिमार्गस्तु भगवतः पुरुषोत्तमस्य वपुषो निःसृतत्वात् मर्यादामार्गोऽयं वैदिकः खलु। परं पुष्टिमास्तु भगवतः पुरुषोत्तमस्रू वपुषो निर्गतत्वात् सुतरां तद्विलक्षणः। मर्यादामार्गे ज्ञान-श्रवणादि साधन-द्वारा सायुज्यमुपलभ्यते। परन्तु पुष्टिमार्गे सर्वात्मनात्मसमर्पणेन विप्रयोगरसात्मकप्रीतिसाचिव्येन साक्षात् आनन्दधाम्नो भगवतो ब्रह्मणोऽमृतत्वप्राप्तिः। तथा च प्राह आचार्योऽपि अणुभाष्ये- 'पुष्टिमार्गेऽङ्गीकृतस्य ज्ञनादिनैरपेक्ष्य-मर्यादायाम् अङ्गीकृतस्य तु तदपेक्षितत्वं तु युक्तमेव' (अणुभाष्य ३.३.२१) 'पुष्टिमार्गोऽनुभवैकसाध्यः प्रमाणमार्गाद् विलक्षण' इति (अणु० ४.४.१)

**भक्तिः-** वल्लभसम्प्रदाये भक्तिरपि द्विविधा मर्यादाभक्तिः पुष्टिभक्तिश्च। एतयोरपि वैलक्षण्यमेवाङ्गीकृतम्। भगवच्चरणारविन्दभक्तिरेव मर्यादाभक्तिः। भगवतो मुखारविन्दभक्तिस्तु पुष्टिभक्तिः। मर्यादाभक्तिः फलं कामयते, पुष्टिभक्तिस्तु फलं नतरामाकाङ्क्षते। मर्यादाभक्तिद्वारा सायुज्यमेव केवलम्, परं पुष्टिभक्तिद्वारा ब्रह्माभेदावबोधः। अतः दुखक्लेशादिसंवलिताज्जगत उद्धाराय यदि कश्चित् श्रेयस्तरो मार्गस्तर्हि स पुष्टिमार्ग एवेति तेषां द्रढीयान् विश्वासः। स एव मुमुक्षुभिः सर्वातमना उपादेयत्वेनाङ्गीकार्य। श्रीमद्भगवद्-वल्लभाचार्येण श्रीमद्भागवतस्याध्यात्म-तत्त्वमाधारीकृत्यैव एष पुष्टिमार्ग प्रतिष्ठापितः।

**प्रस्थानचतुष्टयी** :- उपनिषद्, गीता, ब्रह्मसूत्रं, श्रीमद्भागवत। (व्याससमाधिभाषा) इति प्रस्थानचतुष्टयी एषामाधारभूता। अस्मिन् सम्प्रदाये भागवतस्य निरतिशया प्रतिष्ठा, अणुभाष्यमप्यतिशेते 'सुबोधिनी' ख्यात्या। श्रीहरिरायस्य वचनमिदं सुतरां घटतेतराम्-

**'नाश्रितो वललभाधीशो न च दृष्टा सुबोधिनी।**
**नाराधि राधिकानाथो वृथा तज्जन्म भूतले॥च**

अनेन प्रकारेण संक्षेपेण सम्प्रदायदर्शनिषु मोक्षस्य स्वरूपं विवेचितम्। ●

## उक्ता धरासु रुचिरा शिववीरगाथा

**डॉ० व्रजेन्द्रकुमारसिंहदेवः**
**श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालयः, हरिद्वारम्**

उत्तिष्ठ हे निजभुवः समयोधवृन्द,
धृत्वा कृपाणकुलिशं समरे प्रवेश।
पश्यान्तिके हि यवनाः प्रसरन्ति मार्गे,
उड्डीयते ध्वजपटः समरुत्तरङ्गे॥1॥
आयान्ति पश्य निकषा द्विरदास्तुरङ्गाः,
आयान्ति म्लेच्छयवनाः विजयार्थलाभे।
जातो ध्वनिर्मुखरितो रणशिङ्गयाऽग्रे,
त्रासे समग्रधरणी विदधाति जाड्यम्॥2॥
श्रूत्वा द्विषां रणरवं किमु नीरवं स्यात्,
वेगेन शृङ्गधर हे कुरु युद्धशिङ्गाम्।
न स्यात् निरुत्तरमिह श्रवणात् परं हि,
शत्रोर्विनाशपरका ममराष्ट्रशिङ्गा॥3॥
श्लाघ्या सदैव महती मम मातृभूमि,
रस्यास्तुलां तुलयितुं न हि पुण्यभूमिः।
दुर्लभ - रत्नकिरो सुरवीरगाथा,
देशेषु भारतमिदं खलु सारभूतम्॥4॥
देशस्य गौरवपदं निजदेशकीर्ति,
देशस्यवैभवछविर्न च भाति कुत्र।
युद्धे कथं पुनरपि हृदि निष्प्रभत्वं,
जातं स्वकर्मचरितैरिह मानवानाम्॥5॥
देशस्य रक्षणविधौ भुजविक्रमेषु,
नूं जनेषु च मदो विबुधै प्रदत्तः।
आर्यैर्यदाऽपसरितं प्रवलेन चैक्यं,
तस्मात् शनै प्रसरितं यवने प्रमादः॥6॥
आर्यस्य गौरवतपो दिवसाद् हि तस्मात्,
दास्यान्धकारकराले जलधौ निमज्ज।
आर्यैस्ततो विगणितं परबन्धनञ्च,
त्यक्तस्तु काणपटलैर्निजधर्ममार्गा॥7॥
एकेश्वरः परिणतो यवनै समग्रै,
क्षात्रप्रभावसरणी प्रसृता ह्यलीके।
देशोऽपि भारतरतो न तु नः स्वदेशः,
धिक् धिक् सदैव सततं स्वभुं पुनर्धिक्॥8॥

बुल्गारियादेशस्य लोककथा-

# ✷ दायभागः ✷

श्रीमेवारामकटारा 'पङ्कः'
३६, जसवन्तनगरम्, प्रदर्शनी-मार्गं, भरतपुरम्-३२१००१

बुल्गारियादेशस्य एको ग्रामः। तस्य वास्तव्यः 'उलानः'इत्याख्यो गृहस्थः। तस्य द्वौ पुत्रौ आस्ताम्। तयोः नाम्नी 'ग्वानः' पीतको च। दिवङ्गते पितरि सम्पत्तिमाधृत्य तयोः विवादः जातः। तयोः प्रत्येकं दायस्य बृहत्तरं भागं ग्रहीतुम् ऐच्छत्। प्रतिवेशिनः तत्र शीघ्रम् एव प्राप्य तौ विवदमानौ पृथक्कृत्वा मध्यस्थतां विधाय अशामयन् उलानस्य सम्पत्तिः आसीत्- एकः काकवत् कृष्णः, नागवत् भासमानः च अश्वः, एकः प्रकृतिप्रापकोऽसि धनुरेकः, स्वर्णपक्षाः विंशतिः शराः, बभ्रुवर्णौ द्वौ श्येनौ च। अलम्, इयान् एव आसीत् तस्य दायः। एतस्य कृते एव तयोः विवादः अभवत्।

ततः एको बभ्रुश्मश्रुः वयोवृद्धः तयोः विवादं शमनाय तयोः मध्ये आगत्य अवदत्- 'धिग् युवाम्! युवाम् लज्जाम् अनुभवेतम्। सद्य एव युवयोः जनकः दिवङ्गतः, तस्य चितापि न निर्वापिता, युवां च तस्य दायार्थं कलहं कुरुथः, युवां सहोदरौ स्थः। न एतत् कलहं समीचीनम्।' उलानस्य आत्मजौ तस्य वृद्धस्य वचनं श्रुत्वा नताननौ अभवताम्।

ग्वानः कृष्णाश्वम् आरुह्य शस्यम् अवलोकयितुं क्षत्राणि प्रति अगच्छत्। सः तत्र वनं प्रविश्य एकस्य कूपस्य समीपे व्यरमत्। कूपस्य जलं शैवालेन आवृतम् आसीत्। सः अश्वात् अवातरत्, अश्वं च शस्य अत्तुम् अमुञ्चत्। स एकस्मात् प्रपातात् पतन्तं शीतलं स्वच्छं जलं चापि यथेच्छम् अपिबत्। तत्पश्चात् असौ एकस्य वृक्षस्य कुटिलशाखायाः उपरि अतिष्ठत्। ततः धरातलम् अपश्यत्।

अरण्ये सघनवृक्षाणां मध्ये आसीद् एकः सङ्कीर्णः मार्गः। तस्मिन् मार्गे एका पिपीलिका रिंगति स्म। सा एकं वर्जरान्नकणं प्रेरयन्ती आसीत्। सहसा एव वर्जरकणः एकस्मिन् गर्तेऽपतत्। पिपीलिका तम् अन्नकणं ग्रहीतुं प्रायतत। श्रान्ता पिपीलिका स्वगृहं प्रति चलिता। किञ्चिद् विरम्य सा पुनः आगच्छद् गतं प्रति च अरिङ्गत्। ताम् एका अन्या पिपीलिका अनुसरति स्म। सम्भवतः सा तस्याः स्वसा आसीत्। उभे एव गर्तेऽवातरताम्। ते यथाशक्तिश्रमेण वर्जर-कणं निष्काषयितुं प्रायतेताम्। तं कणं नीत्वा ते स्वगृहं प्रति अचलताम्। ग्वानः सरन्त्यौ पिपीलिकेऽदरीदृशीत्। पश्यन्नेव तस्य हृदयं परिवर्तितम् अभवत्। तस्य

नेत्राभ्यां स्वार्थस्य आवरणोऽपासरत्। तस्य नेत्रयोः स्नेह-प्रकाशो भासते स्म।

इतो यदा अनुजः 'पीतको' अपश्यद् यद् अग्रजोऽश्वमारुह्य गृहान्निर्गतः, सोऽपि द्वौ एव श्येनौ सार्धं नीत्वा गोप्रचरं प्रति प्रस्थानमकरोत्। गोप्रचरे शाद्वलः शोभमाना आसीत्। मुक्ताजालमिव तुषाकरणैः आवृत्ते शाद्वले अनेके भ्रमराः, चित्रपतङ्गाः, खद्योताः च उड्डीयमानाः विचरन्ति स्म। ते मधुरं गुञ्जन्ति स्म। गगनोऽपि नीलाम्बर-छत्रमिव उषाकाले भासमान आसीत्। उपरि एकः श्वेतवर्णः गृध्रः मुक्तगगने निरन्तरं मण्डलाकारम् इतस्ततः परिभ्रमति स्म। यत्कोऽपि अजपोतः स्व-यूथाद् भ्रष्टोऽत्र आगच्छतु तम् अहं गृहीत्वा इतः स्व शावकानां समीपं नयामि। यदा पीतको गृध्रम् अपश्यत् तदा तत्कालमेव असौ स्वश्येनम् अमुञ्चत्। शूरः श्येनः उड्डीयमानः द्रुतगत्या कोदण्डात् निर्गतः शरः इव पश्यन्नेव गृध्रस्य समीपे प्राप्तवान्। उभयोः खगयोः भीषणः सङ्गरः सञ्जातः। तौ उभौ एव भिन्नपक्षौ जातौ। तयोः तनूरुहाणि उन्मूलितानि धरातलेऽपतन्।

अकस्मादेव श्येनः स्वस्य सहायतार्थम् आक्रन्दत्। श्येनस्याक्रन्दनं श्रुत्वा अजानत यत् तस्य श्येनः सङ्कटापन्नोऽस्ति। अतः सहायताम् अपेक्षते। स्थितिं ज्ञात्वा पीतकोऽपरमपि श्येनम् उड्डयत्। तौ उभौ एव मिलित्वा गृध्रं क्षतविक्षतम् अकुरुताम्। अकस्मादेव हताशः गृध्रः आक्रन्दत्। सः पलायितुं प्रायतत। परञ्च उभावेव श्येनौ तम् अभ्यद्रवताम्। तम् अधः धरातले आनयताम्। गृध्रः प्रस्तरमिव धरातले आपतत्। सः अन्तिमेन उच्छ्वासेन सह सम्मुखे पर्वत-शिखरम् अपश्यद् यत्र तस्य शिशवः तं प्रतीक्षमाणाः स्थिताः आसन्। सोऽचिन्तयद् यत् तस्य अपि कश्चित् सहोदरोऽभविष्यत् तदा असौ अवश्यम् एव मे सहायताम् अकरिष्यत्।

पीतकोऽपि स्वश्येनयोः उपरिहस्तेन लालयन् साधुवादं च वितरन् सहैव च नीत्वा स्वगृहमागतवान्। इदानीम् असौ अवगतवान्- 'यदि संसारे कश्चिद् अपि सहोदरः न अस्ति तदा अन्वेष्टव्यम्। यावत् पीतको स्वगृहस्य परिकरं प्रविशति सोऽपश्यत् यत् तस्य भ्राता पलालपुञ्जे तं प्रतीक्षमाणः स्थितः। पीतको तम् अकथयत्- 'भ्रातः! यदा यानि कटुवचनानि उक्तानि तेभ्यो मां क्षन्तुम् अर्हति भवान्। अस्मद् जनकेन यत्किञ्चिद् रिक्थम् इह त्यक्तं तत्सर्वं त्वमेव ग्रहाण, परञ्च न मे प्रकुपितो भव।' इति उक्त्वा असौ स्वभ्रातुः हस्तयुगलं चुम्बितवान्। ग्वानोऽपि तस्य शिरसि हस्तं निधाय अकथयत्- 'न आवाम् इदानीं कदापि कलहं करिष्यावः। साम्प्रतम् उभावेव सार्धमेव स्थास्यावः। परस्परम् अन्योऽन्यञ्च सहायं करिष्यावः। इति ●

# ✷ श्रीगरुडध्वजस्तोत्रम् ✷

डॉ. रामकिशोरमिश्रः
२९५/१४ पट्टीपुरम्
खेकड़ा, २५०१०१
(बागपत) उत्तरप्रदेशः

## तस्मै नमो भगवते गरुडध्वजाय।

(१)

विश्वम्भराय बहुरूपविभूषिताय,
लोकेश्वराय च निशाचरनाशकाय।
नारायणाय गगनाभशरीरकाय,
तस्मै नमो भगवते गरुडध्वजाय॥

(२)

देवाय सर्वविधपापभयाऽहाय,
श्रीशाय सर्वविधमङ्गलसौख्य[illegible]य।
भक्तस्य सर्वविधकीर्तिविवर्धकाय,
तस्मै नमो भगवते गरुडध्वजाय॥

(३)

विष्वग्बलाय जगतीपतयेऽच्युताय,
लक्ष्मीधवाय भुवि नित्यमधोक्षजाय।
पीताम्बराय हरये च चतुर्भुजाय,
तस्मै नमो भगवते गरुडध्वजाय॥

(४)

दैत्यारये भुवि नमः पुरुषोत्तमाय,
पद्माधराय दिवि वा नरकान्तकाय।
प्राचीनयज्ञपुरुषाय जनार्दनाय,
तस्मै नमो भगवते गरुडध्वजाय॥

(५)

दामोदराय बलिरावणनाशकाय,
कंसारये च बलिने मधुसूदनाय।
वीराय कैटभजिते बलिमारकाय,
तस्मै नमो भगवते गरुडध्वजाय॥

(६)

रामकिशोरमिश्रेण शूकरक्षेत्रवासिना।
श्रीगरुडध्वजस्तोत्रं समस्तबोधार्थं कृतम्॥

●

# ✷ होलिकाऽवसरे विशिष्टानि व्यङ्ग्यानि ✷

डॉ. प्रशस्यमित्र शास्त्री,
(साहित्य-अकादमी-राष्ट्रपतिपुरस्कृत:)

### १. कथं पाणे: परिग्रह: ?

वार्त्तालापं प्रकुर्वाणो यज्ञदत्तस्त्वथैकदा ।
सखायं देवदत्तं स प्रश्नमेवम् उवाच यत् ॥
विवाहाऽवसरे तावत् कन्याया पाणिरेव भो ।
कथं हि याच्यते मित्र ! कथं वा गृह्यते तथा ? ॥
यज्ञदत्तस्य तत्प्रश्नं श्रुत्वाऽसौ सस्मितानन: ।
मन्दं मन्दं विहस्यैवं देवदत्तो ब्रवीति यत् ॥
किमिदं मूर्खतापूर्णं प्रश्नमत्र करोषि भो !।
कारणं स्पष्टमेवाऽत्र दृश्यते किं न वेत्सि तत्?॥
कङ्कणं बहुमूल्यं च सौवर्णम् अङ्गुलीयकम् ।
आभूषणानि चाऽन्यानि पाणिष्वेव स्थितानि वै ॥
परन्तु पादयोस्तस्या उपानत् चप्पलं तथा ।
त्वमेव ब्रूहि को मूर्खो गृह्णीयात् चरणं तदा ?॥

### २. प्राप्यमाणाऽपि नो प्राप्या

एकदा यज्ञदत्तस्तु वार्त्तायाम् एवमेव हि ।
सखायं देवदत्तं तु प्रश्नमेनम् उवाच यत् ॥
ब्रूहि सा किं भवेत् या तु त्वत्समक्षमुपस्थिता ।
प्राप्यमाणाऽपि नो प्राप्तुं शक्या तज्ज्ञातुमुत्सहे ॥
यज्ञदत्त-वच: श्रुत्वा देवदत्तस्तदा मुहु: ।
दीर्घमुउच्छ्वासमालम्ब्य तत्क्षणं प्रब्रवीति यत् ॥
जानामि ननु जानामि किं मां त्वमिह पृच्छसि? ।
निश्चितं वर्त्तते सा तु सुन्दरी प्रतिवेशिनी ॥

### ३. विवाहोऽपि विधीयताम्

एकदा यज्ञदत्तस्तु देवदत्तम् उवाच यत् ।
विवाहकाले पत्नी मे नैवाऽभूत् स्नातिका तत: ।
स्नातकस्य परीक्षां तु प्रदाप्य पुनरेव ताम् ।
परा-स्नातककक्षायां पाठयिष्ये तत: परम् ॥
परा-स्नातककक्षायाम् उत्तीर्णायां ततस्त्वहम् ।
प्रेरयिष्ये पुनस्तां च शोधकार्यार्थमेव भो ॥
शोधकार्ये च संयोज्य शीघ्रमेव च तामहम् ।
पी-एच. डी. उपाध्यर्थम् प्रयतिष्ये तत: परम् ॥
सम्पन्ने शोधकार्ये च सञ्जाते डॉक्टरे तथा ।
नियोजनाय सेवायाम् प्रयतिष्ये पुनस्त्वहम् ॥

यज्ञदत्तवचः श्रुत्वा देवदत्तः स्मिताननः ।
क्षुब्धः किञ्चिद् विहस्याऽथ यज्ञदत्तं जगाद यत्॥
सुन्दरं युवकं कञ्चित् मार्गयित्वा ततः परम्।
विवाहमपि तस्यास्त्वं रचयस्व पुनस्तदा॥

### ४. कथं यातस्तया समम्?

प्रातः प्रातः समुत्थाय तर्जयन्ती निरन्तरम् ।
पत्नी रोष-समाविष्टा पतिमेवम् उवाच यत् ।
ह्यस्तने दिवसे रात्रौ चलचित्रं तु वीक्षितुम् ।
कथं त्वं प्रतिवेशिन्या समं चित्रालये गतः ?॥
पत्न्यास्तद् वचनं श्रुत्वा पतिः शान्तमनास्तदा ।
मन्दं विहस्य तत्राह भार्यामेवमिदं वचः ।
साम्प्रतं चलचित्राणि परिवार-जनैः समम् ।
स्थित्वा द्रष्टुं न शक्यानि ततोऽगच्छं तया समम् ॥

### ५. सर्वे पत्न्यास्तु बिभ्यति

एकदा देवदत्तस्य पुत्रः पितरमाह यत् ।
किं बिभेति भवान् तात ! सिंहादिति तु मां वद ॥
पुत्रस्य प्रश्नमाकर्ण्य देवदत्तस्तदाऽवदत् ।
न हि भो! नैव सिंहात्तु बिभेम्यत्र कथञ्चन ॥
अस्तु तर्हि गजात्तावत् बिभेति वा न वा पितः ?।
देवदत्तस्तदा ब्रूते गजादपि बिभेमि नो ॥
भूताद् बिभेति वा नौ वा ? पुत्रोऽपृच्छद् यदा पुनः ।
नाऽहं बिभेमि भूताच्च देवदत्तस्तदाऽब्रवीत ॥
पितुस्तद्वचनं श्रुत्वा पुत्रः स सस्मिताननः ।
पितरं देवदत्तं तु विहसन्नेवमब्रवीत् ॥
अस्तु, ज्ञातं मया चैतत् मातरं परिहृत्य तु ।
कस्माच्चिदपि संसारे न बिभेति भवान् इह ॥

### ६. मन्ये पञ्जरवत् गृहम् !

एकदा देवदत्तस्य पुत्र आश्चर्य-मिश्रितः ।
मातरम् अब्रवीदेकं प्रश्नं स विस्मयान्वितः ॥
कार्यालये यदा मातः पितृपादाः प्रयान्ति ते ।
तदा तेषां मुखे नूनं प्रोत्साहः परिलक्ष्यते ॥
आत्मविश्वास-सम्पन्नाः प्रसाद-परिपूरिताः ।
संहृष्टमानसास्ते च दृश्यन्ते सर्वदा तदा ॥
परन्तु ते यदा सायं गृहे प्रतिनिवर्तिताः ।
दुःखिताश्च समुद्विग्ना उदासीनाः कथं तदा? ॥
पुत्रस्य प्रश्नमाकर्ण्य माता किञ्चिद् विचार्य सा ।
गम्भीरेण स्वरेणाऽथ तनयं प्रत्युवाच यत् ॥
यदा कश्चित् स्वतन्त्रः सन् बहिर्गच्छति पञ्जरात् ।
मुखे तस्य स्वतः पुत्र ! समुत्साहो विराजते ॥
परन्तु पञ्जरे तावद् यदा स प्रविशेत् पुनः ।
दुःखितश्च समुद्विग्नः स्वयमेव भवेत् तदा ॥

# ✳ सुख-दुःखे ✳

डॉ. सुशीलकुमारत्यागी
सहसम्पादकः- भारतोदयः, गुरुकुल-महाविद्यालयः ज्वालापुरं, हरिद्वारम्

(१)
दिव्य-भव्य-विचाराणां, प्राचुर्यं हृदि सम्भवेत्।
अवश्यमेव प्राप्नोति, सुखं ह्यात्मनि मानवः॥

(२)
जीवनस्य सदा भाग्यं, दलानि मधुमाधवे।
उन्मिषन्ति च पत्राणि, क्षणे गच्छन्त्यधौ गतिम्॥

(३)
दुःखाज्जनमनो ग्रस्तं, पावनत्वात् मनः सुखम्।
अनन्तसुख-दुःखानां, यातायातं सदा भवेत्॥

(४)
एवं विधविचाराणां, धारको यो जनो भवेत्।
साफल्यं सततं याति, नामितं दुःखभाग्भवेत्॥

# ✳ भारतोदय-प्रकाशन-विवरणम् ✳

**भारतोदयस्य स्वामित्वानुबन्धि फरवरी-मासात् परं निर्देष्टव्यं विवरणम्**
फार्म-६, नियम-८

| | | |
|---|---|---|
| १. | **प्रकाशन-स्थलम्-** | गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| २. | **प्रकाशन-समयः-** | मासिकम् |
| ३. | **मुद्रकस्य नाम-** | क्षेत्रपालसिंहचौहान |
| | **राष्ट्रियता-** | भारतीयः |
| | **मुद्रणालय-सङ्केतः-** | न्यू जे.एन. स्टेशनरी मार्ट, गुरुद्वारा रोड, ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| ४. | **सम्पादकस्य नाम-** | डॉ. केशवप्रसाद उपाध्यायः |
| | **सङ्केतः-** | गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| ५. | **प्रकाशकस्य नाम-** | क्षेत्रपालसिंहचौहान (मुख्याधिष्ठाता) गु.म.वि. ज्वालापुरम् हरिद्वारम् |
| | **राष्ट्रियता-** | भारतीयः |
| | **सङ्केतः-** | गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| | **पत्रालयः-** | गुरुकुलकाङ्गड़ी-२४९४०४, हरिद्वारम् (उत्तराखण्डः) |

**अहं क्षेत्रपालसिंहचौहान अनेन घोषयामि, यदुपरि लिखितं सर्वं विवरणं ममाभिज्ञानानुसारं यथावद् वर्तते।**

**-क्षेत्रपालसिंहचौहान**
**प्रकाशकः प्रबन्धसम्पादकश्च**

## ✷ महानायकत्वं न वाऽऽप्तम् ✷

मिश्रोऽभिराजराजेन्द्रः
पूर्वकुलपतिः, शिमला।

(१)
हृदि ज्ञानसिन्धुं पुषित्वा कृतं किम्।
अहो निष्फलं मर्त्यजन्मैव जातम्॥

(२)
मुहुश्चुम्बनाऽलिङ्गनैर्गुप्त - भोगैः।
शताब्द्या महानायकत्वं न वाऽऽप्तम्॥

(३)
मुधा यापिता लक्षहोरा अधीतौ।
अवाप्यापि सर्वज्ञतां न प्रभातम्॥

(४)
प्रदत्ताः स्वराष्ट्राय धुर्याः सहस्रम्[१]।
तथाप्यन्धकारात्पृथक्त्वं न जातम्॥

(५)
कथं क्रीकटेऽभूद्रतिर्नैव बाल्यात्।
यतो जीवनं राष्ट्ररत्नं न भातम्॥

(६)
वृथा साधना हन्त सारस्वती सा।
न यद्रत्नतामूल्यमद्याऽवदातम्॥

(७)
कणोऽस्मि ध्रुवं भारतीमृत्तिकायाः।
न तत्किञ्चिदूनं नु रत्नाद् विभातम्॥

(८)
अहो जन्मदा काचिदासीन्ममाऽपि।
प्रदत्तं नु यस्यै मयाऽस्तित्वजातम्[२]॥

(९)
अदृष्टं न मन्येऽधुना प्रागधीनम्।
स्वलालाटिकानां प्रतापादवाप्तम्॥

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः (संस्कृत-मासिकम्)
P.O. गुरुकुलकांगड़ी २४९४०४
हरिद्वारम् (उत्तराखण्डम्)
सेवायाम्, श्री.................

१. आई.ए.एस., आई.पी.एस. अधिकारिण इत्यर्थः।

२. अभिराजी मम जननी। ततोऽहमस्मि अभिराजराजेन्द्रः

मुद्रकेण, प्रकाशकेन ... क्षेत्रपालसिंहचौहान ज्वालापुर-स्थिते 'न्यू जे.एन. स्टेशनरी मार्ट' नामके मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं पत्रं प्राकाश्यं नीतं हरिद्वार-स्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया।
सम्पादकः डॉ. केशवप्रसाद उपाध्यायः